Roll No..........................

Signature of Invigilator .........

| Paper Code |
| --- |
| BV-604 |

# पतंजलि विश्वविद्यालय

## University of Patanjali

### Examination June-2022

**बी.ए. व्याकरण, षष्ठसत्रम्**

**व्याकरणम्, चतुर्थपत्रम्**

**वैदिकसाहित्यम्**

समयः - होरात्रयम् | पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** (15 x3 =45)

1. पृष्टेषु चतुर्षु त्रयाणां मन्त्राणां व्याख्यानं कुर्वन्तु -

(क) यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः।

(ख) यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।

(ग) नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे।।

(घ) भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात।।

2. न्यायदर्शने पञ्चावयवाः के? सविस्तरेण सोदाहरणं वर्ण्यताम्।

3. पृष्टेषु चतुर्षु त्रयाणां श्लोकानामर्थं लिखन्तु।

क) अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदं,
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः।

(ख) त्यजेदाश्वयुजे मासिमुन्यन्नं पूर्वसञ्चितम्,
जीर्णानि चैव वासांसि शाकमूलफलानि च।

(ग) वनेषु च विहृत्यैवं तृतीयं भागमायुषः,
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत्।।

(घ) नाभिनन्देत मरणं नाभिनन्देत जीवितम्।

कालमेव प्रतीक्षेत निर्देशं मृतको यथा॥

**4.** "तमभ्यतपत्तस्याभितप्तस्य ................ रेतस आपः" इति सप्रसङ्गः व्याख्येयम्।

**5.** पृष्टेषु चतुर्षु त्रयाणां पूर्तिः करणीया।

(क) अग्निर्वाग्भूत्वा ...................................... शिश्नं प्राविशन्।

(ख) स ईक्षत कथं न्विदं .............................. इदमदर्शमिती३।

(ग) तदुक्तमृषिणा गर्भे नु .............................. समभवत्समभवत्।

(घ)एष ब्रह्मैष ............................................ प्रज्ञानं ब्रह्म।

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः।** ( 5 x5 =25)

**1.** 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति विस्तरेण वर्ण्यताम्।

**2.** सिद्धान्तः कः? कतिविधश्च।

**3.** श्लोकानां पूर्तिं कुर्वन्तु -

(क) दृष्टिपूतं न्यसेत् .................................... समाचरेत्॥

(ख) सन्त्यज्य ग्राम्य .................................. सहैव वा॥

**4.** ता एता देवताः सृष्टा .................................. इति व्याख्यायताम्।

**5.** यजुर्वेदस्य षट्त्रिंशाऽध्यायस्य स्मृताः केचन पञ्च मन्त्राः लिखन्तु।

**6.** व्याख्या कार्या :-

क्रुद्ध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलंवदेत्।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत्॥

**7.** कोऽयात्मा? किम शरीरम्? कानीन्द्रियाणि? केन्द्रियार्थाः? का च बुद्धिः?

**8.** प्रदत्तानां पञ्चानां मन्त्राणां ऋषिदेवताछन्दोज्ञापनं कुर्वन्तु -

(क) अभी षुणः सखीनामविता जरितॄघणाम्। शतम्भवास्यूतिभिः॥
(ख) यतोयतः समीहसे ततो नोऽभयं कुरु। शं न कुरु प्रजाभ्योऽमयं नः पशुभ्यः॥
(ग) यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीखि मातरः।
(घ) स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्तधाः॥
(ङ) कया त्वं न ऊत्याभि प्त मन्दसे वृषन्। कया स्तोतृभ्यऽआ भर॥

--------------x--------------